PAPER - 2

# MT

2017 .... .... 1100

Seat No. | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I PAPER - II**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

---

## ✶ प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

मातामही शिवानीं स्मरति यतः ....................

(शिवान्याः मनसि पर्यटनप्रेम अस्ति । / शिवान्याः मनसि पक्षिप्रेम अस्ति ।)

II) पूर्णवाक्येन उत्तरत । १

पक्षिमित्रैः पक्षिणाम् अध्ययनार्थं किं कृतम्?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

अभयारण्यं दृष्ट्वा मातामही प्रसन्ना भवति।

चिरंजीविनि शिवानि, नैका आशिषः ।

वत्से, अत्र प्राप्ताहं भरतपुरं दिनद्वयात्पूर्वम् । रमणीयं निसर्गरूपं विविधखगैरुत्कूजितमनुभूय मनो मे न तृप्तिमायाति । त्वां चातीव स्मरामि अत्रागत्य, विशेषतः तव पक्षिप्रेम तेषां विषयकं कौतूहलञ्च । त्वया ज्ञायत एव यदेतत् 'केवलदेवराष्ट्रीयोद्यानं' पक्षिणामभयारण्यम्। तेषां कृते अत्र विशेषव्यवस्था विशेषा निर्बन्धाश्च कृताः भारतशासनेन । एतावद् विशालं वनं द्रष्टुं द्वित्राः दिनाः न पर्याप्ताः, यतोऽस्य क्षेत्रं विस्तीर्णं वैविध्यपूर्णं च। विविधस्वरूपाणां खगानां कृते विविधप्रकाराणि स्थलानि अत्र निर्मितानि । स्थलपक्षिणां शुष्का तृणस्थली, जलविहगार्थं जलस्थली, आनूपं वा स्थलम् अपि च वृक्षखगानामधिवासभूताः महावृक्षा अपि अत्र विद्यन्ते। नैकानि सारङ्गागाराणि विविधवर्णैः खगैः आवासार्थमङ्गीकृतानि अत्र । वृक्षपक्षिणः, तृणपक्षिणः अपि च जलपक्षिणोऽपि अत्र बहुसंख्यया वसन्ति । तेषां त्रिशतषट्षष्टिमिताश्च प्रजातयः सुखेन वसन्ति क्रीडन्ति च । तित्तिरसदृशाः तृणपक्षिणः क्रीडन्तः दृश्यन्ते । वृक्षेषु चित्रबलाकानां कुलानि कलकलं कुर्वन्ति पर्यटकानां चेतांसि हरन्ति। विविधप्रकारकाः क्रौञ्चाः तृणेषु भक्ष्यं गवेषमाणाः दूरतः नयनपथमायान्ति । जलेषु खगानां बहवः जातिविशेषाः विहरन्तः दृश्यन्ते । श्वेतः चमसचञ्चूः इति पक्षिविशेषः सविशेषं लक्ष्यते। अन्येऽपि पक्षिणोऽत्र शीतवासार्थं देशान्तरादपि आयान्ति । सैबेरियादेशात् आगच्छन्तः अत्र शीततर्तौ वसन्तः क्रौञ्चाः अधुना नामशेषतां गताः इति तु दुःखकरं लज्जास्पदमपि । लद्दाखप्रान्तादपि नैके खगा आगत्य अत्र हिमसमये वसन्ति ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

i) प्राप्ताहम् - ....... + ....... ।

II) चतुर्थपदं लिखत । १

i) द्विजः : खगः :: पठनेच्छुः : ....... ।

III) गद्यांशात् चित्वा विशेषणं लिखत । १

i) ....... दिनाः । ....... जातिविशेषाः।

IV) गद्यांशात् चित्वा सप्तम्यन्तशब्दौ लिखत । १

**३. स्वमतप्रकटनम् ।** २

राष्ट्रीयोद्यानस्य महत्त्वं माध्यमभाषया स्पष्टीकुरुत ।

**ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

वानराः दंष्टुमधावन्, यतः .............

(स्वामी निश्चलः अभिमुखः जातः । / स्वामिना पद्प्रहारस्य अभिनयः कृतः ।)

II) पूर्णवाक्येन उत्तरत । १

के स्वामिनं मार्गे अन्वधावन्?

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

याचकः निर्भयतायाः उपदेशं करोति ।

जिज्ञासुः विचारशीलः बालनरेन्द्रः सदैव चिन्तनमग्नः आसीत् । एकदा मात्रादिष्ट दुर्गादिव्याः मूर्तिं क्रीत्वा स गृहमागच्छत् । दुर्गापूजामहोत्सवं नाम शक्तिपूजनमिति स जानाति स्म । गृहं निवर्तमानः सः शक्तेः स्वरूपचिन्तने मग्नोऽभवत् । अकस्मात् तस्य विचारमाला खण्डिता तुरगपदानां रवेण । तेन दृष्टं यत् मण्डलाधिकारिणः अश्वयानं मार्गे वेगेन धावति इति । स्वसंरक्षणाय स मार्गाद् दूरं गन्तुं प्रायतत । सहसा तेन दृष्टं यत् काचन बालिका मार्गे खेलने मग्नास्ति । सा अश्वयानागमनविषये न जानाति । सवेगम् अश्वयानं तस्याः कृते यमयानमेव। तद्विलोक्य नरेन्द्रस्य हस्ताद् मूर्तिः पतिता । तेन धावित्वा झटिति सा बालिका अश्वमार्गाद् दूरीकृता तस्याः मात्रे च प्रदत्ता । तस्याः मात्रा अश्रुपूर्णनयनाभ्यां तस्मै आशीर्वचनं दत्तम् । यदा स गृहमागतः तदा तेन ज्ञातं यत् तस्य हस्तात् च्युता मूर्तिः तत्रैव मार्गे भग्ना वर्तते । आत्मानमपराधिनं मत्वा स मात्रे सर्वमकथयत् । तदा मात्रोक्तं ''वत्स नरेन्द्र, विरम शोकात्। यद्यपि त्वया मूर्तेः पूजा न कृता तथापि बालिकायाः साहाय्यं कृत्वा, बालिकारूपशक्तिदेवतायाः एव पूजनं कृतम्।'' धन्या सा माता धन्यश्च बालनरेन्द्रः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) पूर्वपदं लिखत । १

i) कोऽपि : कः + अपि :: कठिनोऽयम् - ....... + ....... ।

II) पर्यायशब्दांना मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | देवालयः | मार्गः। |
| (2) | पन्थाः | मन्दिरम् । |
| | | धर्मः । |

III) गद्यांशे 'स्वामी' शब्दस्य कृते उपयुक्ते द्वे विशेषणे ........ , ........ । १

IV) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये ........ , ........ । १

**३. पृथक्करणम् ।**

क्रमानुसारं योजयत । २

विवेकानन्दमहोदयः
- १. पलायितुमारभत ।
- २. भीतः ।
- ३. अन्नपूर्णायाः मन्दिरं गतः ।
- ४. पदप्रहारस्य अभिनयः कृतः ।

**क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

प्रसन्नचित्तेन भगवता सुगतेन भिक्षवे नूतनचीवराणि दत्तानि, यतः ............

(भिक्षुणा भगवतः सुगतस्य सेवा कृता । /

भिक्षुणा पुरातनचीवरस्य पूर्णतया उपयोगः कृतः।)

II) कः कं वदति । १

पुरातनपादपोशिनः सूत्राणि वर्तिरूपेण उपयुज्यन्ते ।

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

मा कुरुत अनावश्यकक्रयणम् इति भारतीया विचारसरणिः ।

एकदा कोऽपि भिक्षुःभगवन्तं प्रति जगाम । तं प्रणम्य अधोमुखः सोऽतिष्ठत् । भगवता पृष्टः सः अकथयत्, ''मम चीवराणि जीर्णानि अतः प्रार्थये ददातु मे नूतनचीवराणि ।'' ततः भगवता पृष्टं किं कृतं त्वया पुरातनचीवराणाम्? स प्रत्यवदत्, ''भगवन्, तत् चीवरं मया शयनीयरूपेणोपयोजितम्''। भगवान् पप्रच्छ ''किं कृतं त्वया पुरातनशयनीयस्य।'' स उवाच अहं रात्रौ तद् उपधानरूपेण गृह्णामीति । तदाकर्ण्य कुतुहलेन भगवान् अवोचत्, ''वत्स ! कुत्रास्ति ते पुरातनमुपधानम् ।'' तदपि जीर्णं जातमतः मया तद् पादस्वच्छीकरणाय द्वारे पादपोशी इति स्थापितं तथा च पुरातनपादपोशिनः सूत्राणि दीपस्य कृते वर्तिरूपेण उपयुज्यन्ते मयेति प्रत्युवाच सः । तच्छ्रुत्वा प्रसन्नचित्तेन भगवता तस्मै नूतनचीवराणि दत्तानि ।

प्राचीनैषा कथा वस्तुवस्तुनः उपयोगः कथं करणीयः इति कथयति नः । क्षुद्रवस्तुनः निर्माणेऽपि नैसर्गिकसंसाधनं तथैव मानवीयपरिश्रमाणामावश्यकता विद्यते । चित्ताकर्षकं वस्तु क्रीत्वा पश्चाद् यदि न रोचते तर्हि सहजतया वयं बहिः त्यजामः । येन केनापि रूपेण वस्तुनः उपयोगः भवत्येव इति मनसि कर्तव्यम् । उपभुज्य त्यजत इति विचारं दूरीकृत्य विविधप्रकारैः पुनःपुनः उपयोगं कुरुत । मा कुरुत अनावश्यकक्रयणमिति भारतीया विचारसरणिः अनुकरणीया । स्मर्तव्यमिदं सर्वदा अमूल्यं विद्यते सर्वम् ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) उचितं पर्यायं चित्वा लिखत । १

i) तच्छ्रुत्वा - ...... + ...... । (तत् + छुत्वा / तच् + श्रुत्वा / तत् + श्रुत्वा)

ii) प्राचीनैषा - ...... + ...... । (प्राचीन+ऐषा /प्राचीना+एषा / प्राचीना+ऐषा)

II) विलोमपदानां मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | क्रयणम् | नूतनम् । |
| (2) | पुरातनम् | जीर्णम् । |
| | | विक्रयणम् । |

III) गद्यांशतः उचितविशेषणे चित्वा लिखत । १

i) .......... उपधानम् ।

ii) .......... वस्तु ।

IV) गद्यांशे आगते सम्बोधनपदान्त - शब्दौ लिखत ........ , ........ । १

३. **पृथक्करणम् ।** २

शब्दपेटिकां पूरयत । (प्रदेशाकारमनुसृत्य)

(तपोवनम्, भारतदेशः, बौद्धविहारः, अवन्तिनगरम्)



## ✶ द्वितीयः विभागः - पद्यम् ।

**प्र.२. अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. पृथक्करणम् ।** २




धृतिः क्षमा दया शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ।।१।।
धर्मः सर्वसुखाकरो हितकरो धर्मं बुधाश्चिन्वते
धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः ।
धर्मान्नास्त्यपरः सुहृद् भवभृतां धर्मस्य मूलं दया
धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म मां पालय ।।२।।

**२. माध्यमभाषया लिखत ।** २

द्वितीयश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् ।**

I) पद्यांशे आगते विलोमपदे लिखत । १

i) शत्रुः × ....... ।    ii) सुलभम् × ....... ।

II) पृथक्करणम् । १

गजनीनरेशस्य द्वे विशेषणे



वंशेऽथ तस्मिन् किल फारुकेन्द्रो बभूव राजा मलिकाभिधानः ।
तस्याभवत् सूनुरुदारचेताः कुलावतंसो गजनीनरेशः ।।१।।
मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवे न्मित्रेण तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला -
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ।।२।।
अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।
यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ।।३।।

२. **अन्वयपूर्तिः ।** २
अहो, महतां ...... अपूर्वम् । विपत्तिकाले अपि ...... (क्रियते) यथा ...... आस्यमध्ये पतितः अपि कलानिधिः ...... ददाति।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४
i) मुहूर्तं .............. मृदुः ॥
ii) रागे .............. प्रशस्यते ॥
iii) अणुपूर्वं .............. कुरु ॥

**ड) वृत्तनाम चिनुत ।** १

वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥

अस्य श्लोकस्य वृत्तनाम ......... इति । (इन्द्रवज्रा / उपेन्द्रवज्रा / गीतिः)

**✶ तृतीयः विभागः - स्थूलवाचनम् ।**

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **अवबोधनम् । (केऽपि २ कृती कुरुत ।)**
I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १
संस्कृतभाषा राष्ट्रभाषा भवितुमर्हति इति भीमरायस्य अभिमतम् ।

II) एकपदेन उत्तरं लिखत । १
कः भीमरायं शङ्कां पप्रच्छ ?

प्रियसंस्कृतवाग्भीमः कामं जानन् विबुधवाङ्महत्ताम् ।
ऐच्छत् तां स्थापयितुं हिन्दीव राष्ट्रवाचः पदे ॥१॥
दलितमहासङ्घस्य च कार्यसभायां तदा भीमरायः ।
प्रस्तावोपन्यासं कृतवान् गीर्वाणवाग्विषयम् ॥२॥
संस्कृतवाङ्माहात्म्यं विशदीकुर्वंस्तदा भीमरायः ।
प्रोवाच संस्कृता वाक् भारतीयसंस्कृतेर्मूलम् ॥३॥
नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम् ।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम् ॥४॥
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति ।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः ॥५॥
मैत्रोपनाम विद्वाञ् ज्ञातुं भीमस्य संस्कृतज्ञानम् ।
पप्रच्छ भीमरायं संस्कृतवाण्यैव निजशङ्काः ॥६॥
प्रत्युत्ततार मैत्रं गीर्वाणगिरैव भीमरायोऽपि ।
श्रुत्वा तत्संवादं सर्वेऽप्यासन् चकितचकिताः ॥७॥
वृत्तं तन्नैकेषु प्रकाशितं प्रमुखवृत्तपत्रेषु ।
पाठं पाठं सर्वे प्रभावितास्तस्य चातुर्यात् ॥८॥

२. **पृथक्करणम् ।** २

मेलनं कुरुत ।

| | अ | ब |
|---|---|---|
| (1) | तत्संवादं श्रुत्वा | गीर्वाणगिरैव प्रत्युत्ततार । |
| (2) | मैत्रोपनाम विद्वान् | सर्वे प्रभाविताः । |
| (3) | वृत्तं पाठं पाठं | सर्वे चकितचकिताः । |
| (4) | भीमरायः | संस्कृतवाण्या निजशङ्काः पप्रच्छ । |

**✶ चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

अ) **परिच्छेदपूर्तिः ।**

मञ्जूषातः उचितशब्दान् चित्वा परिच्छेदं पुनर्लिखत । ५

अद्यत्वे हॉकीक्रीडा जनानां लोकप्रिया क्रीडा वर्तते । शतमीटरपरिमिते विशाले ....... एकस्मिन् पक्षे एकादशक्रीडकानाम् अपरस्मिन् पक्षे च एकादशक्रीडकानाम् इतस्ततः धावतां दृश्यम् अतीव मनोहारि । यदा निपुणक्रीडकेन नीयमानः कन्दुकः परपक्षगोले प्रविशति तदा दर्शकाः करतलध्वनिं कुर्वन्तः ....... उत्साहं वर्धयन्ति। यः दलः अधिकान् ....... करोति स विजयी भवति। आकाशवाणियन्त्रात् हॉकीप्रतियोगितानां समाचारान् अनेके जनाः श्रुण्वन्ति अथ च दूरदर्शनयन्त्रेभ्योऽपि लक्षशः ....... क्रीडकानां खेलचातुर्यं ....... प्रसीदन्ति। हॉकीक्रीडा भारतीयानां राष्ट्रीया क्रीडा। भारतेन ऑलिम्पिकप्रतियोगितासु स्वर्णपदकं लब्धम्।

(विजयिपक्षस्य, दर्शकाः, क्रीडाङ्गणे, गोलकान्, दृष्ट्वा)

ब) **३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. संस्कृतभाषा । २. वृत्तपत्राणि । ३. दीपावलिः ।

क) **संस्कृतानुवादः ।**

८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत । ५

i) न्यायाधीशाने अपराध्याला शासन करावे.
ii) नाटकाच्या प्रारंभी सूत्रधार (आपल्या) बायकोला बोलावतो.
iii) धैर्य माणसाचे मोठे भूषण आहे.
iv) कार्यक्रम केव्हा सुरु होईल ?
v) तुझ्या भावाचे नाव सांग.
vi) ही फुले आम्हा दोघांकडून आणली गेली आहेत.
vii) वाघ गवत आणि झाडांची पाने खात नाही.
viii) मुलांची नावे मला आठवत नाहीत.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१. धातु रुच् (१ आ.प.) २. धातु याच् (१ आ.प.)

३. धातु रक्ष् (१ प.प.) ४. धातु स्निह् (४ प.प.)

ii) अशुद्धिसंशोधनम्-अव्ययानि प्रयुज्य रचितेषु ४वाक्येषु २वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१. भानोः अभितः पृथ्वी परिभ्रमति ।

२. महिलाभ्यः कृते शिक्षणम् आवश्यकम् ।

३. अलं कोपम् ।

४. रमा पाककलायाः प्रवीणा ।

## ✶ पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।

**प्र.५. यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | आज्ञार्थः | वर्तमानकालः | परोक्षः भूतकालः | विध्यर्थः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः |
|---|---|---|---|---|---|---|
| ब्रू (२ प.प.) | ....... | ब्रवीति | ....... | ब्रूयात् | ....... | ....... |
| तन्(८आ.प) | तनुताम् | ....... | ....... | ....... | ....... | अतनुत |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सम्बोधनम् | ....... | ....... | भगवन्तः |
| प्रथमा | ....... | अनुयायिनौ | ....... |
| पञ्चमी | तस्मात् | ....... | ....... |
| द्वितीया | ....... | युवाभ्याम् - वाम् | ....... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(पृष्टवान्, ज्ञातम्, मान्यः, कृता, शयनीयम्, अनुसरन्तः, ज्ञातवती, अनुतिष्ठन्तः)

**ड) समासाः ।**

**विग्रहवाक्यानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | अ | ब |
|---|---|---|
| i) | विविधाः वर्णाः, तैः । | इतरेतर द्वन्द्व समास |
| ii) | वेगेन सह । | उपपद तत्पुरुष समास |
| iii) | छाया च आतपः च । | बहुव्रीहि समास |
| iv) | न प्रियम्, तस्मिन् । | षष्ठी तत्पुरुष समास |
| v) | मनः हरति इति । | कर्मधारय समास |
| vi) | शीतवासाय इदम् । | नञ् तत्पुरुष समास |
| vii) | चमसः इव चञ्चूः यस्य सः । | चतुर्थी तत्पुरुष समास |
| viii) | रसानां निर्मितिः । | अव्ययीभाव समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) जनाः सङ्गणकीयपत्रेण स्वसन्देशं प्रेषयन्ति। (प्रयोगं परिवर्तयत।)

ii) भवान् सत्वरमागच्छतु । (त्वम् योजयत् ।)

iii) दृष्टमात्रे तस्मिन् चित्रे तस्य मनः प्रहृष्टमेव। (सतिसप्तमीरचनां निष्कासयत।)

vi) वृक्षात् फलानि पतन्ति । ('बाल' इति प्रयोजककर्तृपदम् उपयुज्य वाक्यं पुनर्लिखत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) एतेषां ....... वैद्यानामुपचाराः उत्तमाः न सन्ति किम्? (६)

ii) ....... प्रमुखाः दिशः सन्ति । (४)

iii) अस्याम् आवल्यां ....... मञ्चः त्रुटितः । (दुसरा)

iv) दिनस्य ....... महिलाः अवकरसङ्ग्रहणं कुर्वन्ति । (दोनदा)

## ✶ षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र. ६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

राईटबन्ध्वोः प्रयोगाद् अष्टवर्षपूर्वं भारद्वाजमुनिना लिखितस्य ''यन्त्रसर्वस्वम्'' नाम्नः ग्रन्थाधारेण शिवकर - बापूजी - तळपदे नाम्ना केनचिद् वैज्ञानिकेन गिरगावसमुद्रतटे सफलतया विमान-उड्डान-प्रयोगः कृतः। प्रयोगसमये बॅ. जयकरः, महाराजः सयाजिराय-गायकवाडः इत्यादयः मान्यवराः उपस्थिताः। दुर्दैवेन एषा महत्त्वपूर्णा घटना दुर्लक्षिता जाता। तळपदे महोदयेन विमानस्य इन्धनत्वेन रसः तथा सूर्यशक्तिः उपयोजिते। सम्प्रति नासा संस्थापि तस्याः अवकाशयानानां कृते तदेव इन्धनम् उपयोजयति।

**ब) संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

पादोपभुङ्क्ते तव पादुकेय
एते प्रयच्छ प्रणताय मूर्ध्ना।
यावद् भवानेष्यति कार्यसिद्धिं
तावद् भविष्याम्यनयोर्विधेयः।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

राजा – (समन्तादवलोक्य) सूत, अकथितोऽपि ज्ञायत एव यथायमाश्रमाभोगस्तपोवनस्योति। (स्तोकमनन्तरं गत्वा) तपोवननिवासिनामुपरोधो मा भूत्। एतावत्येव रथं स्थापय यावदवतरामि।

सूतः – धृताः प्रग्रहाः। अवतरत्वायुष्मान्।

राजा – (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावद् गृह्यताम्। (इति सूतस्याभरणानि धनुश्चोपनीयार्पयति।)

**Best of Luck**